



श्री GANESHA SHLOKAS AND STOTRA

Created by Dipti Dhakull

गणनायकाष्टकम्



एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥ १॥

मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनम् ।
बालेन्दुसुकलामौलिं वन्देऽहं गणनायकम् ॥ २॥

अम्बिकाहृदयानन्दं मातृभिः परिवेष्टितम् ।
भक्तिप्रियं मदोन्मत्तं वन्देऽहं गणनायकम् ॥ ३॥

चित्ररत्नविचित्राङ्गं चित्रमालाविभूषितम् ।
चित्ररूपधरं देवं वन्देऽहं गणनायकम् ॥ ४॥

गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम् ।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ॥ ५॥

मूषकोत्तममारुह्य देवासुरमहाहवे
योद्धुकामं महावीर्यं वन्देऽहं गणनायकम् ॥ ६॥


यक्षकिन्नरगन्धर्वैस्सिद्धविद्याधरैस्सदा
स्तूयमानं महाबाहुं वन्देऽहं गणनायकम् ॥ ७॥

सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितम् ।
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम् ॥ ८॥

गणाष्टकमिदं पुण्यं यः पठे सततं नरः
सिद्ध्यन्ति सर्वकार्याणि विद्यावान् धनवान् भवेत् ॥ ९॥

इति श्रीगणनायकाष्टकं सम्पूर्णम् ।

जन्ममृत्युविहीनं श्रीगणनाथस्तोत्रम्



॥ श्रीगणेशाय नमः ॥ गर्भ उवाच ।
नमस्ते गणनाथाय ब्रह्मणे ब्रह्मरूपिणे ।
अनाथानां प्रणाथाय विघ्नेशाय नमो नमः ॥ १॥
ज्येष्ठराजाय देवाय देवदेवेशमूर्तये ।
अनादये परेशाय चादिपूज्याय ते नमः ॥ २॥
सर्वपूज्याय सर्वेषां सर्वरूपाय ते नमः ।
सर्वादये परब्रह्मन् सर्वेशाय नमो नमः ॥ ३॥
गजाकारस्वरूपाय गजाकारमयाय ते ।
गजमस्तकधाराय गजेशाय नमो नमः ॥ ४॥
आदिमध्यान्तभावाय स्वानन्दपतये नमः ।
आदिमध्यान्तहीनाय त्वादिमध्यान्तगाय ते ॥ ५॥
सिद्धिबुद्धिप्रदात्रे च सिद्धिबुद्धिविहारिणे ।
सिद्धिबुद्धिमयायैव ब्रह्मेशाय नमो नमः ॥ ६॥
शिवाय शक्तये चैव विष्णवे भानुरूपिणे ।
मायिनां मायया नाथ मोहदाय नमो नमः ॥ ७॥
किं स्तौमि त्वां गणाधीश यत्र वेदादयोऽपरे ।
योगिनः शान्तिमापन्ना अतस्त्वां प्रणमाम्यहम् ॥ ८॥
रक्ष मां गर्भदुःखात्त्वं त्वामेव शरणागतम् ।
जन्ममृत्युविहीनं वै कुरुष्व ते पदप्रियम् ॥ ९॥
इति जन्ममृत्युविहीनं श्रीगणनाथस्तोत्रं सम्पूर्णम् ॥

श्री अष्टविनायकस्तोत्रम्



स्वस्ति श्रीगणनायकं
गजमुखं मोरेश्वरं सिद्धिदं
बल्लाळं मुरुडं विनायकं मढं
चिन्तामणीस्थेवरम् ।
लेण्याद्रिं गिरिजात्मजं सुवरदं
विघ्नेश्वरं ओझरं
ग्रामे रांजणसंस्थितं
गणपतिः कुर्यात् सदा
मङ्गलम् ॥



गणेशस्तुतिगीतम्

हेमजासुतं भजे गणेशमीशनन्दनं
एकदन्त वक्रतुण्ड नागयज्ञसूत्रकम् ।
रक्तगात्र धूम्रनेत्र शुक्लवस्त्रमण्डितं
कल्पवृक्ष भक्त रक्ष नमोऽस्तुते गजाननम् ॥ १॥

पाशपाणि चक्रपाणि मूषकादिरोहिणं
अग्निकोटि सूर्यज्योति वज्रकोटि निर्मलम् ।
चित्रभाल भक्तिजाल भालचन्द्रशोभितं
कल्पवृक्ष भक्त रक्ष नमोऽस्तुते गजाननम् ॥ २॥

भूतभव्य हव्यकव्य भृगुभार्गवार्चितं
दिव्यवह्नि कालजाल लोकपालवन्दितम् ।
पूर्णब्रह्म सूर्यवर्ण पूरुषं पुरान्तकं
कल्पवृक्ष भक्त रक्ष नमोऽस्तुते गजाननम् ॥ ३॥

विश्ववीर्य विश्वसूर्य विश्वकर्मनिर्मलं
विश्वहर्ता विश्वकर्ता यत्र तत्र पूजितम् ।
चतुर्मुखं चतुर्भुजं सेवितं चतुर्यगं
कल्पवृक्ष भक्त रक्ष नमोऽस्तुते गजाननम् ॥ ४॥

ऋद्धि बुद्धि अष्टसिद्धि नवनिधानदायकं
यज्ञकर्म सर्वधर्म सर्ववर्णार्चितम ।
पूत धूम्र दुष्ट मुष्ट दायकं विनायकं
कल्पवृक्ष भक्त रक्ष नमोऽस्तुते गजाननम् ॥ ५॥

हर्षरूप वर्षरूप पुरुषरूपवन्दितं
शूर्पकर्ण रक्तवर्ण रक्तचन्दनलेपितम् ।
योग इष्ट योग सृष्ट योग दृष्टिदायकं
कल्पवृक्ष भक्त रक्ष नमोऽस्तुते गजाननम् ॥ ६॥

इति गणेशस्तुतिगीतं समाप्तम् ।



विघ्ननिवारकं सिद्धिविनायकस्तोत्रम्

श्री गणेशाय नमः ॥

विघ्नेश विघ्नचयखण्डननामधेय श्रीशङ्करात्मज सुराधिपवन्द्यपाद ।
दुर्गामहाव्रतफलाखिलमङ्गलात्मन् विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ १॥
सत्पद्मरागमणिवर्णशरीरकान्तिः श्रीसिद्धिबुद्धिपरिचर्चितकुङ्कुमश्रीः ।
दक्षस्तने वलयितातिमनोज्ञशुण्डो विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ २॥
पाशाङ्कुशाब्जपरशूंश्च दधच्चतुर्भिर्दोर्भिश्च शोणकुसुमस्त्रगुमाङ्गजातः ।
सिन्दूरशोभितललाटविधुप्रकाशो विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ ३॥
कार्येषु विघ्नचयभीतविरञ्चिमुख्यैः सम्पूजितः सुरवरैरपि मोदकाद्यैः ।
सर्वेषु च प्रथममेव सुरेषु पूज्यो विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ ४॥
शीघ्राञ्चनस्खलनतुङ्गरवोर्ध्वकण्ठस्थूलोन्दुरुद्रवणहासितदेवसङ्घः ।
शूर्पश्रुतिश्च पृथुवर्तुलतुङ्गतुन्दो विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ ५॥
यज्ञोपवीतपदलंभितनागराजो मासादिपुण्यददृशीकृतऋक्षराजः ।
भक्ताभयप्रद दयालय विघ्नराज विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ ६॥
सद्रत्नसारततिराजितसत्किरीटः कौसुम्भचारुवसनद्वय ऊर्जितश्रीः ।
सर्वत्रमङ्गलकरस्मरणप्रतापो विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ ७॥
देवान्तकाद्यसुरभीतसुरार्तिहर्ता विज्ञानबोधेनवरेण तमोपहर्ता ।
आनन्दितत्रिभुवनेशु कुमारबन्धो विघ्नं ममापहर सिद्धिविनायक त्वम् ॥ ८॥
इति मौद्गलोक्तं विघ्ननिवारकं सिद्धिविनायकस्तोत्रं सम्पूर्णम् ॥

श्रीगणेश आरम्भप्रार्थना



आरम्भ नमस्काराः

श्रीगणेशाय नमः ।

श्रीस्वानन्देशाय ब्रह्मणस्पतये नमः ।

श्रीमहासिद्धये नमः ।

श्रीमहाबुद्धये नमः ।

श्रीलक्षाय नमः ।

श्रीलाभाय नमः ।

श्रीनग्नभैरवराजाय नमः ।

श्रीमद् गणकाय परंब्रह्मगुरवे नमः ।

श्रीमन् मुद्गलाय परमाचार्याय नमः ।

श्री भ्रूशूण्डी गार्ग्य गृत्समद भृगु व्यासाय नमः ।

श्रीमत् सकलगाणेशगुरुभ्यो आचार्येभ्यश्च नमो नमः ।

श्रीब्रह्मभूय महासिद्धिपीठाधीश्वर श्रीमद्गिरिजासुत योगीन्द्राय नमः ।


श्रीमद्गाणेश जगद्गुरवे श्रीमद्गणेशयोगीन्द्राचार्याय नमः ।

श्रीमदङ्कुशधारिणे सद्गुरवे योगीन्द्राय नमः ।

श्रीसद्गुरु हेरम्बराजाय नमः ।

इति श्रीगणेश आरम्भप्रार्थना सम्पूर्णा ॥

- ॥ श्रीगणेशपुराणं उपासना (पूर्व)खण्ड । अध्याय १ । १.० ॥



श्रीगणपतिस्तोत्रम्

द्विरदानन विघ्नकाननज्वलन त्वं प्रथमेशनन्दन ।
मदनपतिमाखुवाहन ज्वलनाभासितपिङ्गलोचन ॥ १॥
अहिबन्धन रक्तचन्दन प्रियदूर्वाङ्कुरभारपूजन ।
शशिभूषण भक्तपालन ज्वलनाक्षाऽव निजान्निजावन ॥ २॥
विविधामरमत्र्यनायकः प्रथितस्त्वं भुवने विनायकः ।
तव कोऽपि हि नैव नायकस्तत एव त्वमजो विनायक ॥ ३॥
बलिनिग्रह ईश केशवस्त्रिपुराख्यासुरनिग्रहे शिवः ।
जगदुद्भवनेऽब्जसम्भवः सकलान्जेतुमहो मनोभवः ॥ ४॥
महिषासुरनिग्रहे शिवा भवमुक्त्यै मुनयो धृताशिवाः ।
यमपूजयदिष्टसिद्धये वरदो मे भव चेष्टसिद्धये ॥ ५॥
गजकर्णक मूषकस्थिते वरदे त्वय्यभये हृदि स्थिते ।
जयलाभरमेष्टसम्पदाः खलु सर्वत्र कुतो वदापदाः ॥ ६॥
सङ्कल्पितं कार्यमविघ्नमीश द्राक्सिद्धिमायातु ममाखिलेश ।
पापत्रयं मे हर सन्मतीश तापत्रयं मे हर शान्त्यधीश ॥ ७॥
गणाधीशो धीशो हरिहरविधीशोऽभयकरो
गुणाधीशो धीशो विजयत उमाहृत्सुखकरः ।
बुधाधीशो नीशो निजभजकविघ्नौघहरको
मुदाधीशो पीशो यशस उभयर्धेश्च शरणम् ॥ ८॥
इति श्रीवासुदेवानन्दसरस्वतीविरचितं गणपतिस्तोत्रं सम्पूर्णम् ।



पाशाय बन्धमोक्षकरं श्रीगणेशस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

अहमुवाच ।

पाशाय शस्त्रराजाय नमस्ते बन्धरूपिणे ।
मोक्षरूपाय वै तुभ्यं गणेशकरभूषण ॥ १॥
मोहो मायामयः प्रोक्तो बन्धदः सर्वजन्तवे ।
गणेशज्ञानयुक्तश्चेद् बन्धहीनो नरो भवेत् ॥ २॥
तदेव बन्धरूपाख्यं शस्त्रं तस्य महात्मनः ।
त्वमेव पाशरूपं वै बन्धमोक्षकरं महत् ॥ ३॥
ये त्वां शरणमापन्नास्तेषां ते बन्धजं भयम् ।
नास्ति शस्त्र च मां पाहि शरणागतमादरात् ॥ ४॥
नमस्ते तेजसां नाथ दुष्टनाशकराय ते ।
पाशाय परमास्त्राय शस्त्राणां ब्रह्मणे नमः ॥ ५॥
एवं स्तुत्वा महापाशं प्रणनाम कृताञ्जलिः ।
अहङ्कारश्च तं त्यक्त्वा पाशो विघ्नेश्वरं ययौ ॥ ६॥

(फलश्रुतिः)

इदं स्तोत्रं पठेद्यस्तु तस्य बन्धो विनश्यति ।
मायापाशमयः साक्षाद्गणेशे स लभेद्गतिम् ॥ ७॥
गतं पाशं विलोक्यैवाहङ्कारो गुरुणा युतः ।
धूम्रवर्णं जगामाऽसौ तं दृष्ट्वा प्रणनाम ह ॥ ८॥
इति पाशाय बन्धमोक्षकरं श्रीगणेशस्तोत्रं सम्पूर्णम् ॥

श्रीविनायकस्तुतिः



देवा ऊचुः -

नमस्ते गजवक्त्राय नमस्ते गणनायक ।
विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम ॥ १॥
नमोऽस्तु ते विघ्नहर्त्रे नमस्ते सर्पमेखल ।
नमस्ते रुद्रवक्त्रोत्थ प्रलम्बजठराश्रित ॥ २॥
सर्वदेवनमस्कारादविघ्नं कुरु सर्वदा ॥ ३॥


॥ फलश्रुतिः ॥

एवं स्तुतस्तदा देवैर्महात्मा गणनायकः ।
अभिषिक्तस्तु रुद्रेण सोमायाऽपत्यताङ्गतः ॥ ४॥
एतच्चतुर्थ्यां सम्पन्नं गणाध्यक्षस्य पार्थिवः ।
यतस्ततोऽयं महतिं तिथीनां परमा तिथिः ॥ ५॥
एतस्यां यस्तिलान् भुक्त्वा भक्त्या गणपतिं नृप ।
आराधयति तस्याशु तुष्यते नाऽत्र संशयः ॥ ६॥
यश्चैतत्पठते स्तोत्रं यश्चैतच्छृणुयात्सदा ।
न तस्य विघ्ना जायन्ते न पापं सर्वथा नृप ॥ ७॥
॥ इति श्रीवाराहमहापुराणे विनायकोत्पत्तिर्नाम
त्रयोविंशोऽध्याये श्रीविनायकस्तुतिः समाप्ता ॥



गणेशगीतम्


पार्वती नन्दनं विघ्नविनाशकं
प्रथमार्चित चरणं उपास्महे ॥ पल्लवि॥
पाशाङ्कुशधरम् सर्व विघ्नहरं
भवसञ्चित पाप तिमिरहरं भास्करं
मूलाधार चक्र नीवासिनं
सुरराजार्चितं स्मरामहे ॥ १॥
मूषिक वाहनं लम्बोदरं
स्कन्दपूर्वजं वीतरागिणं
जगत्पावन कारणं अजं
परम शुभङ्करं भजामहे ॥ २ ॥



गणनाथ ध्यानं

एकदंतम् । मूलाधार चक्रनिवसंतं
। अनंतं । प्रतिपादित सर्वसिद्धांतं
। महाशांतं । धीमंतं ।
'गं' बीजाक्षरोपासितम् ।
संकटवशवृंदाश्रितम् । चिंतितविश्वहितं
। अपराजितं । शाश्वतं ।
पाशांकुशधर करांबुजभूषितं । मूषकासुराराधितं
। सिद्धिबुद्धिसेवितं । सर्वयज्ञदान
तपारंभादिपूजितं । मुनिगणदेवगणाश्रितं
। शिवमनोहरसुतं ।
तं गणनाथं सततं भजेहम्॥

वाल्मीकिकृतं श्रीगणेशस्तवनम्
अथवा गणेशाष्टकम्



चतुःषष्टिकोट्याख्यविद्याप्रदं त्वां सुराचार्यविद्याप्रदानापदानम् ।
कठाभीष्टविद्यार्पकं दन्तयुग्मं कविं बुद्धिनाथं कवीनां नमामि ॥ १॥
स्वनाथं प्रधानं महाविघ्ननाथं निजेच्छाविसृष्टाण्डवृन्देशनाथम् ।
प्रभु दक्षिणास्यस्य विद्याप्रदं त्वां कविं बुद्धिनाथं कवीनां नमामि ॥ २॥
विभो व्यासशिष्यादिविद्याविशिष्टप्रियानेकविद्याप्रदातारमाद्यम् ।
महाशाक्तदीक्षागुरुं श्रेष्ठदं त्वां कविं बुद्धिनाथं कवीनां नमामि ॥ ३॥
विधात्रे त्रयीमुख्यवेदांश्च योगं महाविष्णवे चागमाञ् शङ्कराय ।
दिशन्तं च सूर्याय विद्यारहस्यं कविं बुद्धिनाथं कवीनां नमामि ॥ ४॥
महाबुद्धिपुत्राय चैकं पुराणं दिशन्तं गजास्यस्य माहात्म्ययुक्तम् ।
निजज्ञानशक्त्या समेतं पुराणं कविं बुद्धिनाथं कवीनां नमामि ॥ ५॥
त्रयीशीर्षसारं रुचानेकमारं रमाबुद्धिदारं परं ब्रह्मपारम् ।
सुरस्तोमकायं गणौघाधिनाथं कविं बुद्धिनाथं कवीनां नमामि ॥ ६॥
चिदानन्दरूपं मुनिध्येयरूपं गुणातीतमीशं सुरेशं गणेशम् ।
धरानन्दलोकादिवासप्रियं त्वां कविं बुद्धिनाथं कवीनां नमामि ॥ ७॥
अनेकप्रतारं सुरक्ताब्जहारं परं निर्गुणं विश्वसद्ब्रह्मरूपम् ।
महावाक्यसन्दोहतात्पर्यमूर्तिं कविं बुद्धिनाथं कवीनां नमामि ॥ ८॥
इदं ये तु कव्यष्टकं भक्तियुक्तास्त्रिसन्ध्यं पठन्ते गजास्यं स्मरन्तः ।
कवित्वं सुवाक्यार्थमत्यद्भुतं ते लभन्ते प्रसादाद् गणेशस्य मुक्तिम् ॥ ९॥

इति वाल्मीकिकृतं गणेशस्तवनं समाप्तम् ।



गणपति वंदनं

हे द्युतिमय शरीर । पाशांकुशधर । गणेश्वर

। गुणेश्वर । विघ्नहर

। महोदर । शिवपार्वतीसुकुमार

कलुषविदूर । सद्विचार रत्नाकर । रक्षमाम् ॥

मातंगानन । मूषकवाहन


। ज्ञान निकेतन । मूलाधार चक्रसदन

। भवभंजन रक्षमाम् ॥

हे अज । चतुर्भुज ।

षणमुखाग्रज । महातेजस्विपूजित


पदपंकज रक्षमाम् ॥



सन्तानगणपतिस्तोत्रम्

श्रीगणेशाय नमः ।

नमोऽस्तु गणनाथाय सिद्धिबुद्धियुताय च ।
सर्वप्रदाय देवाय पुत्रवृद्धिप्रदाय च ॥ १॥
गुरुदराय गुरवे गोप्त्रे गुह्यासिताय ते ।
गोप्याय गोपिताशेषभुवनाय चिदात्मने ॥ २॥
विश्वमूलाय भव्याय विश्वसृष्टिकराय ते ।
नमो नमस्ते सत्याय सत्यपूर्णाय शुण्डिने ॥ ३॥
एकदन्ताय शुद्धाय सुमुखाय नमो नमः ।
प्रपन्नजनपालाय प्रणतार्तिविनाशिने ॥ ४॥
शरणं भव देवेश सन्ततिं सुदृढा कुरु।
भविष्यन्ति च ये पुत्रा मत्कुले गणनायक ॥ ५॥
ते सर्वे तव पूजार्थं निरताः स्युर्वरोमतः ।
पुत्रप्रदमिदं स्तोत्रं सर्वसिद्धिप्रदायकम् ॥ ६॥
इति सन्तानगणपतिस्तोत्रं सम्पूर्णम् ।



श्रीरत्नगर्भहेरम्बस्तवः

(शिष्याशीर्वचनात्मकस्तवाः)

साधयतु कार्यजालं तावकमाशु प्रणम्रजनवरदः ।

रत्नव्रजलसदुदरो गणनाथो


हेतुशून्यकरुणाब्धिः ॥ १॥

इति शृङ्गेरि श्रीजगद्गुरु

श्रीसच्चिदानन्दशिवाभिनवनृसिंह-

भारतीस्वामिभिः विरचितः

श्रीरत्नगर्भहेरम्बस्तवः सम्पूर्णः ।



महागणपत्येकविंशतिनामावलिः

ॐ गणञ्जाय नमः ।

ॐ गणपतये नमः । ॐ हेरम्बाय नमः ।

ॐ धरणीधराय नमः । ॐ महागणपतये नमः ।

ॐ लक्षप्रदाय नमः । ॐ क्षिप्रप्रसादनाय नमः ।

ॐ अमोघसिद्धये नमः । ॐ अमिताय नमः ।

ॐ मन्त्राय नमः । १० ॐ चिन्तामणये नमः ।

ॐ निधये नमः । ॐ सुमङ्गलाय नमः ।

ॐ बीजाय नमः । ॐ आशापूरकाय नमः ।

ॐ वरदाय नमः । ॐ शिवाय नमः ।

ॐ काश्यपाय नमः । ॐ नन्दनाय नमः ।

ॐ वाचासिद्धाय नमः । ॐ ढुण्ढिर्विनायकाय नमः । २१

इति महागणपत्येकविंशतिनामावलिः समाप्ता ।

श्रीगणेशमन्त्रस्तोत्रम्




श्रीगणेशाय नमः ।

उद्दालक उवाच ।

शृणु पुत्र महाभाग योगशान्तिप्रदायकम् ।
येन त्वं सर्वयोगज्ञो ब्रह्मभूतो भविष्यसि ॥ १॥
चित्तं पञ्चविधं प्रोक्तं क्षिप्तं मूढं महामते ।
विक्षिप्तं च तथैकाग्रं निरोधं भूमिसञ्ज्ञकम् ॥ २॥
तत्र प्रकाशकर्ताऽसौ चिन्तामणिहृदि स्थितः ।
साक्षाद्योगेश योगेज्ञैर्लभ्यते भूमिनाशनात् ॥ ३॥
चित्तरूपा स्वयंबुद्धिश्चित्तभ्रान्तिकरी मता ।
सिद्धिर्माया गणेशस्य मायाखेलक उच्यते ॥ ४॥
अतो गणेशमन्त्रेण गणेशं भज पुत्रक ।
तेन त्वं ब्रह्मभूतस्तं शन्तियोगमवापस्यसि ॥ ५॥
इत्युक्त्वा गणराजस्य ददौ मन्त्रं तथारुणिः ।
एकाक्षरं स्वपुत्राय ध्यनादिभ्यः सुसंयुतम् ॥ ६॥
तेन तं साधयति स्म गणेशं सर्वसिद्धिदम् ।
क्रमेण शान्तिमापन्नो योगिवन्द्योऽभवत्ततः ॥ ७॥
इति मुद्गलपुराणोक्तं गणेशमन्त्रस्तोत्रं समाप्तम् ।

श्रीगणेशाष्टोत्तरशतनामावलिः



ॐ गजाननाय नमः । गणाध्यक्षाय । विघ्नराजाय । विनायकाय ।
द्वैमातुराय । सुमुखाय । प्रमुखाय । सन्मुखाय । कृतिने ।
ज्ञानदीपाय । सुखनिधये । सुराध्यक्षाय । सुरारिभिदे ।
महागणपतये । मान्याय । महन्मान्याय । मृडात्मजाय । पुराणाय । -

पुरुषाय । पूष्णे नमः ॥ २० ॥

ॐ पुष्करिणे नमः । पुण्यकृते । अग्रगण्याय । अग्रपूज्याय । अग्रगामिने ।
मन्त्रकृते । चामीकरप्रभाय । सर्वस्मै । सर्वोपास्याय । सर्वकर्त्रे ।
सर्वनेत्रे । सर्वसिद्धिप्रदाय । सर्वसिद्धाय । सर्ववन्द्याय ।
महाकालाय । महाबलाय । हेरम्बाय । लम्बजठराय । ह्रस्वग्रीवाय ।

महोदराय नमः ॥ ४० ॥

ॐ मदोत्कटाय नमः । महावीराय । मन्त्रिणे । मङ्गलदाय ।
प्रमथाचार्याय । प्राज्ञाय । प्रमोदाय । मोदकप्रियाय । धृतिमते ।
मतिमते । कामिने । कपित्थप्रियाय । ब्रह्मचारिणे । ब्रह्मरूपिणे ।
ब्रह्मविदे । ब्रह्मवन्दिताय । जिष्णवे । विष्णुप्रियाय । भक्तजीविताय ।

जितमन्मथाय नमः ॥ ६० ॥

ॐ ऐश्वर्यदाय नमः । गुहज्यायसे । सिद्धिसेविताय । विघ्नकर्त्रे ।
विघ्नहर्त्रे । विश्वनेत्रे । विराजे । स्वराजे । श्रीपतये । वाक्पतये ।
श्रीमते । शृङ्गारिणे । श्रितवत्सलाय । शिवप्रियाय । शीघ्रकारिणे ।
शाश्वताय । शिवनन्दनाय । बलोद्धाय । भक्तनिधये ।

भावगम्याय नमः ॥ ८० ॥

ॐ भवात्मजाय नमः । महते । मङ्गलदायिने । महेशाय । महिताय ।
सत्यधर्मिणे । सदाधाराय । सत्याय । सत्यपराक्रमाय । शुभाङ्गाय ।
शुभ्रदन्ताय । शुभदाय । शुभविग्रहाय । पञ्चपातकनाशिने ।
पार्वतीप्रियनन्दनाय । विश्वेशाय । विबुधाराध्यपदाय ।
वीरवराग्रगाय । कुमारगुरुवन्द्याय । कुञ्जरासुरभञ्जनाय नमः ॥ १०० ॥
ॐ वल्लभावल्लभाय । वराभयकराम्बुजाय । सुधाकलशहस्ताय ।
सुधाकरकलाधराय । पञ्चहस्ताय । प्रधानेशाय । पुरातनाय ।

वरसिद्धिविनायकाय नमः ॥ १०८ ॥

इति गणेशाष्टोत्तरशतनामावलिः समाप्ता ।

श्रीगणेशाष्टोत्तरशतनामावलिः



ॐ अकल्मषाय नमः । ॐ अग्निगर्भच्छिदे नमः । ॐ अग्रण्ये नमः । ॐ अजाय
नमः । ॐ अद्भुतमूर्तिमते नमः । ॐ अध्यक्षाय नमः । ॐ अनेकाचिताय नमः । ॐ अव्यक्तमूर्तये नमः । ॐ अव्ययाय
नमः । ॐ अव्ययाय नमः । १० । ॐ आश्रिताय नमः । ॐ इन्द्रश्रीप्रदाय नमः । ॐ इक्षुचापधृते
नमः । ॐ उत्पलकराय नमः । ॐ एकदन्ताय
नमः । ॐ कलिकल्मषनाशनाय नमः । ॐ कान्ताय नमः । ॐ कामिने नमः । ॐ कालाय
नमः । ॐ कुलाद्रिभेत्त्रे नमः । २० । ॐ कृतिने नमः । ॐ कैवल्यशुखदाय नमः । ॐ गजाननाय
नमः । ॐ गणेश्वराय नमः । ॐ गतिने नमः । ॐ गुणातीताय नमः । ॐ गौरीपुत्राय नमः । ॐ ग्रहपतये
नमः । ॐ चक्रिणे नमः । ॐ चण्डाय नमः । ३० । ॐ चतुराय नमः । ॐ चतुर्बाहवे नमः । ॐ चतुर्मूर्तिने
नमः । ॐ चन्द्रचूडामण्ये नमः । ॐ जटिलाय नमः । ॐ तुष्टाय
नमः । ॐ दयायुताय नमः । ॐ दक्षाय नमः । ॐ दान्ताय नमः । ॐ दूर्वाबिल्वप्रियाय नमः । ४० । ॐ देवाय नमः । ॐ
द्विजप्रियाय नमः । ॐ द्वैमात्रीयाय नमः । ॐ धीराय नमः । ॐ
नागराजयज्ञोपवीतवते नमः । ॐ निरङ्जनाय नमः । ॐ परस्मै नमः । ॐ पापहारिणे
नमः । ॐ पाशांकुशधराय नमः । ॐ पूताय नमः । ५० । ॐ
प्रमत्तादैत्यभयताय नमः । ॐ प्रसन्नात्मने नमः । ॐ बीजापूरफलासक्ताय नमः । ॐ बुद्धिप्रियाय नमः । ॐ ब्रह्मचारिणे
नमः । ॐ ब्रह्मद्वेषविवर्जिताय नमः । ॐ ब्रह्मविदुत्तमाय नमः । ॐ भक्तवाञ्छितदायकाय
नमः । ॐ भक्तविघ्नविनाशनाय नमः । ॐ भक्तिप्रियाय नमः । ६० । ॐ मायिने नमः । ॐ मुनिस्तुत्याय
नमः । ॐ मूषिकवाहनाय नमः । ॐ रमार्चिताय नमः । ॐ लंबोदराय
नमः । ॐ वरदाय नमः । ॐ वागीशाय नमः । ॐ वाणीप्रदाय नमः । ॐ विघ्नराजाय
नमः । ॐ विधये नमः । ७० । ॐ विनायकाय नमः । ॐ
विभुदेश्वराय नमः । ॐ वीतभयाय नमः । ॐ शक्तिसम्युताय नमः । ॐ शान्ताय नमः । ॐ शाश्वताय
नमः । ॐ शिवाय नमः । ॐ शुद्धाय नमः । ॐ शूर्पकर्णाय नमः । ॐ
शैलेन्द्रतनुजोत्सङ्गकेलनोत्सुकमानसाय नमः । ८० । ॐ श्रीकण्ठाय नमः । ॐ श्रीकराय नमः । ॐ श्रीदाय
नमः । ॐ श्रीप्रतये नमः । ॐ सच्चिदानन्दविग्रहाय
नमः । ॐ समस्तजगदाधाराय नमः । ॐ समाहिताय नमः । ॐ सर्वतनयाय
नमः । ॐ सर्वरीप्रियाय नमः । ॐ सर्वसिद्धिप्रदाय नमः । ९० । ॐ सर्वसिद्धिप्रदायकाय
नमः । ॐ सर्वात्मकाय नमः । ॐ सामघोषप्रियाय नमः । ॐ सिद्धार्चितपदांबुजाय
नमः । ॐ सिद्धिदायकाय नमः । ॐ सृष्टिकर्त्रे नमः । ॐ
सोमसूर्याग्निलोचनाय नमः । ॐ सौम्याय नमः । ॐ स्कन्दाग्रजाय नमः । ॐ स्तुतिहर्षिताय
नमः । १०० । ॐ स्थुलकण्ठाय नमः । ॐ स्थुलतुण्डाय नमः । ॐ स्वयंकर्त्रे
नमः । ॐ स्वयंसिद्धाय नमः । ॐ स्वलावण्यसुतासारजितमन्मथविग्रहाय नमः । ॐ हरये नमः
। ॐ हृष्ठाय नमः । ॐ ज्ञानिने नमः । १०८ ।

॥ इति श्री विनायक अष्टोत्तरशत नामावली सम्पूर्णम् ॥


श्रीगणेशाष्टोत्तरशतनामावलिः



॥ श्रीगणेशाय नमः ॥

ॐ गणेशाय नमः । हेरम्बाय । गजाननाय । महोदराय । स्वानुभवप्रकाशिने । वरिष्ठाय । सिद्धिप्रियाय । बुद्धिनाथाय । अनेकविघ्नान्तकाय । वक्रतुण्डाय । स्वसंज्ञवासिने । चतुर्भुजाय । कवीशाय । देवान्तकनाशकारिणे । महेशसूनवे । गजदैत्यशत्रवे । वरेण्यसूनवे । विकटाय । त्रिनेत्राय । परेशाय नमः । २० । ॐ धरणीधराय (पृथ्वीधराय) नमः । एकदन्ताय । प्रमोदाय । मोदाय । नरान्तकारये । षड्डूर्मिहन्त्रे । गजकर्णाय । ढुण्ढये । द्वन्द्वारिसिन्धौ स्थिरभावकारिणे । विनायकाय । ज्ञानविघातशत्रवे । पराशरस्यात्मजाय । विष्णुपुत्राय । अनादिपूज्याय । आखुगाय । सर्वपूज्याय । विधेर्जाय (वैरिञ्च्याय) । लम्बोदराय । धूम्रवर्णाय । मयूरपालाय नमः । ४० । ॐ मयूरवाहिने नमः । सुरासुरैस्सेवितपादपद्माय । वरिणे । महाखुध्वजाय । शूर्पकर्णाय । शिवाय । अजाय । सिंहस्थाय । अनन्तवाहाय । दितौजाय । विघ्नेश्वराय । शेषनाभये । अणोरणीयसे । महतो महीयसे । रवेर्जाय । योगेशाय । ज्येष्ठराजाय । निधीशाय । मन्त्रेशाय । शेषपुत्राय नमः । ६० । ॐ वरप्रदात्रे नमः । अदितेः सूनवे । पराशरज्ञानदाय (परात्पराय,ज्ञानदाय) तारवक्त्राय । गुहाग्रजाय । ब्रह्मपाय । पार्श्वपुत्राय । सिन्धोः शत्रवे । परशुप्रपाणये । शमीशाय । पुष्पप्रियाय । विघ्नहारिणे । दूर्वाभरैरर्चिताय । देवदेवाय । धियः प्रदात्रे । शमीप्रियाय । सुसिद्धिदात्रे । सुशान्तिदात्रे । अमेयमायाय । अमितविक्रमाय नमः । ८० । ॐ द्विधा चतुर्थीप्रियाय नमः । कश्यपाज्जाताय । धनप्रदाय । ज्ञानप्रदाय । प्रकाशाय । चिन्तामणये । चित्तविहारकारिणे । यमस्य शत्रवे । अभिमानशत्रवे । विधेर्जहन्त्रे (विघ्नौघहन्त्रे) । कपिलस्य सूनवे । विदेहाय । स्वानन्दाय । अयोगयोगाय । गणस्य शत्रवे । कमलस्य शत्रवे । समस्थाय (समस्तभावज्ञाय) । भावज्ञाय । भालचन्द्राय । अनादिमध्यान्तमयाय नमः । १०० । ॐ प्रचारिणे नमः । विभवे । जगद्रूपाय । गणेशाय । भूम्ने । पुष्टेः पतये । आखुगताय । बोधाय । कर्त्रे । पात्रे । संहराय । १११ ।

इति मुद्गलपुराणे पञ्चमखण्डे षड्विंशतितमाध्यायान्तर्गता श्रीगणेशाष्टोत्तरशतनामावलिः समाप्ता ।



श्रीगणेश्वरप्रमाणिका

श्रीरामजयम् ।

सद्गुरु श्रीत्यागराजस्वामिने नमो नमः ।

ॐ विनायकाय विद्महे । विघ्नघ्नाय च धीमहि ।


तन्नो दन्तिः प्रचोदयात् ॥

अथ श्रीगणेश्वरप्रमाणिका ।

गणेशनाममोदनं कराम्बुजस्थमोदकम् ।
वरप्रसाददैविकं सुरासुरार्चितं वरम् ॥ १॥
कुविघ्नवारणं गणं सुहासहस्तिवक्त्रकम् ।
शिवाशिवस्य पुत्रकं शिवाकरं शिवंकरम् ॥ २॥
सुकार्यसादरानुतं सुकाव्यपुष्पवर्षकम् ।
सुभाषदं सुगानदं सुनामकीर्तनामुदम् ॥ ३॥
सुनामकं सुबोधदं लयश्रुतिप्रनृत्यकम् ।
सुकाव्यनादरासकं सुरासशब्दभावकम् ॥ ४॥
सुरागदं विरागदं लयाश्रयं लयास्पदम् ।
सदामुदं मुदारसं सदा भजे गणेश्वरम् ॥ ५॥
गणेश्वरप्रमाणिका गणेश्वरप्रसादिका ।
गणेश्वरप्रसादजा गणेश्वरप्रसाददा ॥ ६॥
प्रसादकाय मङ्गलं रुजापहाय मङ्गलम् ।
गणेश्वराय मङ्गलं सुमङ्गलाय मङ्गलम् ॥ ७॥
गुरुप्रगेयनाटकं गुरुप्रसन्नकीर्तनम् ।
गुरुप्रसादकीर्तितं गुरुप्रसादमङ्गलम् ॥ ८॥

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया कृता
श्रीगणेश्वरप्रमाणिका गुरौ समर्पिता ।

ॐ शुभमस्तु ।



श्रीराधाकृतं गणेशस्तोत्रम्

श्री गणेशाय नमः ।

राधिकोवाच ।

परं धाम परं ब्रह्म परेशं परमीश्वरम् ।
विघ्ननिघ्नकरं शान्तं पुष्टं
कान्तमन्तकम् ॥ १॥
सुरासुरेन्द्रैः सिद्धेन्द्रै स्तुतं स्तौमि परात्परम् ।
सुरपद्मदिनेशं च गणेशं मङ्गलायनम् ॥ २॥
इदं स्तोत्रं महापुण्यं विघ्नशोकहरं परम् ।
य पठेत् प्रातरुत्थाय
सर्वविघ्नात् प्रमुच्यते ॥ ३॥
इति श्रीब्रह्मवैवर्ते
राधाकृतं गणेशस्तोत्रं सम्पूर्णम् ।



पंचश्लोकिगणेशपुराणम्

श्रीविघ्नेशपुराणसारमुदितं व्यासाय धात्रा पुरा
तत्खण्डं प्रथमं महागणपतेश्चोपासनाख्यं यथा ।
संहर्तुं त्रिपुरं शिवेन गणपस्यादौ कृतं पूजनं
कर्तुं सृष्टिमिमां स्तुतः स विधिना व्यासेन बुद्ध्याप्तये ॥ १॥
सङ्कष्ट्याश्च विनायकस्य च मनोः स्थानस्य तीर्थस्य वै
दूर्वाणां महिमेति भक्तिचरितं तत्पार्थिवस्यार्चनम् ।
तेभ्यो यैर्यदभीप्सितं गणपतिस्तत्तत्प्रतुष्टो ददौ
ताः सर्वा न समर्थ एव कथितुं ब्रह्मा कुतो मानवः ॥ २॥
क्रीडाकाण्डमथो वदे कृतयुगे श्वेतच्छविः काश्यपः
सिंहाङ्कः स विनायको दशभुजो भूत्वाथ काशीं ययौ ।
हत्वा तत्र नरान्तकं तदनुजं देवान्तकं दानवं
त्रेतायां शिवनन्दनो रसभुजो जातो मयूरध्वजः ॥ ३॥
हत्वा तं कमलासुरं च सगणं सिन्धुं महादैत्यपं
पश्चात् सिद्धिमती सुते कमलजस्तस्मै च ज्ञानं ददौ ।
द्वापारे तु गजाननो युगभुजो गौरीसुतः सिन्दुरं
सम्मर्द्य स्वकरेण तं निजमुखे चाखुध्वजो लिप्तवान् ॥ ४॥
गीताया उपदेश एव हि कृतो राज्ञे वरेण्याय वै
तुष्टायाथ च धूम्रकेतुरभिधो विप्रः सधर्मर्धिकः ।
अश्वाङ्को द्विभुजो सितो गणपतिर्म्लेच्छान्तकः स्वर्णदः
क्रीडाकाण्डमिदं गणस्य हरिणा प्रोक्तं विधात्रे पुरा ॥ ५॥
एतच्छ्लोकसुपञ्चकं प्रतिदिनं भक्त्या पठेद्यः पुमान् ।
निर्वाणं परमं व्रजेत् स सकलान् भुक्त्वा सुभोगानपि ॥

॥ इति श्रीपंचश्लोकिगणेशपुराणम् ॥

मङ्गलाचरणम्



श्री गणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां राशिं नाशयति विऽघ्नानाम् ॥ १॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ २॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ ३॥

विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ४॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ ५॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ६॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ७॥

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शंभुर्भगवान् बादरायणः ॥ ८॥


इति मङ्गलाचरणं सम्पूर्णम् ॥



ढुण्ढिराजभुजंगप्रयातस्तोत्रम्

उमाङ्गोद्भवं दन्तिवक्त्रं गणेशं भजे कङ्कणैः शोभितं धूम्रकेतुम् ।
गले हारमुक्तावलीशोभितं तं नमो ज्ञानरूपं गणेशं नमस्ते ॥ १॥
गणेशैकदन्तं शुभं सर्वकार्ये स्मरन् मन्मुखं ज्ञानदं सर्वसिद्धिम् ।
मनश्चिन्तितं कार्यसिद्धिर्भवेत्तं नमो बुद्धिकल्पं गणेशं नमस्ते ॥ २॥
कुठारं धरन्तं कृतं विघ्नराजं चतुर्भिर्मखैरेकदन्तैकवर्णम् ।
इदं देवरूपं गणं सिद्धिनाथं नमो भालचन्द्रं गणेशं नमस्ते ॥ ३॥
शिरःसिन्दुरं कुङ्कुमं देहवर्णं शुभैभादिकं प्रीयते विघ्नराजम् ।
महासङ्कटच्छेदने धूम्रकेतुं नमो गौरिपुत्रं गणेशं नमस्ते ॥ ४॥
तथा पातकं छेदितुं विष्णुनामं तथा ध्यायतां शंकरं पापनाशम् ।
यथा पूजितं षण्मुखं शोकनाशं नमो विघ्ननाशं गणेशं नमस्ते ॥ ५॥
सदा सर्वदा ध्यायतामेकदन्तं सदा पूजितं सिन्दुरारक्तपुष्पैः ।
सदा चर्चितं चन्दनैः कुङ्कुमाक्तं नमो ज्ञानरूपं गणेशं नमस्ते ॥ ६॥
नमो गौरिदेह-मलोत्पन्न तुभ्यं नमो ज्ञानरूपं नमः सिद्धिपं तम् ।
नमो ध्यायतामर्चतां बुद्धिदं तं नमो गौर्यपत्यं गणेशं नमस्ते ॥ ७॥
भुजङ्गप्रयातं पठेद् यस्तु भक्त्या प्रभाते नरस्तन्मयैकाग्रचित्तः ।
क्षयं यान्ति विघ्ना दिशः शोभयन्तं नमो ज्ञानरूपं गणेशं नमस्ते ॥ ८॥

॥ इति श्रीढुण्ढिराजभुजङ्गप्रयातस्तोत्रं सम्पूर्णम् ॥



मयूरेशस्तोत्रम्


ब्रह्मोवाच ।

पुराणपुरुषं देवं नानाक्रीडाकरं मुदा ।
मायाविनं दुर्विभाग्यं मयूरेशं नमाम्यहम् ॥ १॥
परात्परं चिदानन्दं निर्विकारं हृदिस्थितम् ।
गुणातीतं गुणमयं मयूरेशं नमाम्यहम् ॥ २॥
सृजन्तं पालयन्तं च संहरन्तं निजेच्छया ।
सर्वविघ्नहरं देवं मयूरेशं नमाम्यहम् ॥ ३॥
नानादैत्यनिहन्तारं नानारूपाणि बिभ्रतम् ।
नानायुधधरं भक्त्या मयूरेशं नमाम्यहम् ॥ ४॥
इन्द्रादिदेवतावृन्दैरभिष्टतमहर्निशम् ।
सदसद्व्यक्तमव्यक्तं मयूरेशं नमाम्यहम् ॥ ५॥
सर्वशक्तिमयं देवं सर्वरूपधरं विभुम् ।
सर्वविद्याप्रवक्तारं मयूरेशं नमाम्यहम् ॥ ६॥
पार्वतीनन्दनं शम्भोरानन्दपरिवर्धनम् ।
भक्तानन्दकरं नित्यं मयूरेशं नमाम्यहम् ॥ ७॥
मुनिध्येयं मुनिनुतं मुनिकामप्रपूरकम् ।
समष्टिव्यष्टिरूपं त्वां मयूरेशं नमाम्यहम् ॥ ८॥
सर्वज्ञाननिहन्तारं सर्वज्ञानकरं शुचिम् ।
सत्यज्ञानमयं सत्यं मयूरेशं नमाम्यहम् ॥ ९॥
अनेककोटिब्रह्माण्डनायकं जगदीश्वरम् ।
अनन्तविभवं विष्णुं मयूरेशं नमाम्यहम् ॥ १०॥

मयूरेश उवाच ।

इदं ब्रह्मकरं स्तोत्रं सर्वपापप्रनाशनम् ।
कारागृहगतानां च मोचनं दिनसप्तकात् ॥ ११॥
आधिव्याधिहरं चैव भुक्तिमुक्तिप्रदं शुभम् ॥ १२॥

इति मयूरेशस्तोत्रं सम्पूर्णम् ।



दशाक्षरमन्त्रस्तोत्रम्

श्रीगणेशाय नमः ।

मुद्गल उवाच ।

असच्छक्तिश्च सत्सूर्यः समो विष्णुर्महामुने ।
अव्यक्तः शङ्करस्तेषां संयोगे गणपो भवेत् ॥ १॥
संयोगे मायया युक्तो गणेशो ब्रह्मनायकः ।
अयोगे मायया हीनो भवति मुनिसत्तमा ॥ २॥
संयोगायोगयोर्योगे योगो गणेशसंज्ञितः ।
शान्तिभ्यः शान्तिदः प्रोक्तो भजने भक्तिसंयुतः ॥ ३॥
एवमुक्त्वा गणेशस्य ददौ मन्त्रं स मुद्गलः ।
एकाक्षरं विधियुतं ततः सोऽन्तर्हितोऽभवत् ॥ ४॥
ततोऽहं गणराजं तमभजं सर्वभावतः ।
तेन शान्ति समायुक्तश्चरामि त्वकुतोभयः ॥ ५॥
न गणेशात्परं ब्रह्म न गणेशात्परं तपः ।
न गणेशात्परं कर्म ज्ञानं न गणपात्परम् ॥ ६॥
न गणेशात्परो योगो भक्तिर्न गणपात्परा ।
तस्मात्स सर्वपूज्योऽयं सर्वादौ सिद्धिदायकः ॥ ७॥
गणेशानं परित्यज्य कर्मज्ञानादिकं चरेत् ।
तत्सर्वं निष्फलं याति भस्मनि प्रहुतं यथा ॥ ८॥
सर्वांस्त्यज्य गणेशं यो भजतेऽनन्यचेतसा ।
सर्वसिद्धिं लभेत्सद्यो ब्रह्मभूतः स कथ्यते ॥ ९॥
एवमुक्त्वाऽत्रितस्तस्मै ददौ मन्त्रं दशाक्षरम् ।
विधियुक्तं ततः साक्षादन्तर्धानं चकार ह ॥ १०॥

इति दशाक्षरमन्त्रस्तोत्रं समाप्तम् ।



श्रीकल्पकगणेशपञ्चरत्नस्तवः

श्रीमदुमापतिशिवप्रणीतः

श्रीमत्तिल्ववने सभेशसदन-प्रत्यक्ककुब्गोपुरा-
धोभागस्थित चारुसद्मवसतिर्भक्तेष्टकल्पद्रुमः ।
नृत्तानन्दमदोत्कटो गणपतिः संरक्षताद्वोऽनिशं
दूर्वासः प्रमुखाखिलर्षि विनुतः सर्वेश्वरोऽग्र्योऽव्ययः ॥ १॥

श्रीमत्तिल्लवनाभिधं पुरवरं क्षुल्लावुकं प्राणिनां
इत्याहुर्मुनयः किलेति नितरां ज्ञातुं च तत्सत्यताम् ।
आयान्तं निशि मस्करीन्द्रमपि यो दूर्वाससं प्रीणयन्
नृत्तं दर्शयति स्म नो गणपतिः कल्पद्रुकल्पोऽवतात् ॥ २॥

देवान् नृत्तदिदृक्षया पशुपतेरभ्यागतान् कामिनः
शक्रादीन् स्वयमुद्धृतं निजपदं वामेतरं दर्शयन् ।
दत्वा तत्तदभीष्टवर्गमनिशं स्वर्गादिलोकान्विभुः
निन्ये यः शिवकामिनाथतनयः कुर्याच्छिवं वोऽन्वहम् ॥ ३॥

अस्माकं पुरतश्चकास्तु भगवान् श्रीकल्पकाख्योऽग्रणीः
गोविन्दादि सुरार्चितोऽमृतरसप्राप्त्यै गजेन्द्राननः ।
वाचं यच्छतु निश्चलां श्रियमपि स्वात्मावबोधं परं
दारान् पुत्रवरांश्च सर्वविभवं कात्यायनीशात्मजः ॥ ४॥

वन्दे कल्पक कुञ्जरेन्द्रवदनं वेदोक्तिभिस्तिल्वभू-
देवैः पूजितपादपद्मयुगलं पाशच्छिदं प्राणिनाम् ।
दन्तादीनपि षड्भुजेषु दधतं वाञ्छाप्रदत्वाप्तये
स्वाभ्यर्णाश्रयिकामधेनुमनिशं श्रीमुख्यसर्वार्थदम् ॥ ५॥

औमापत्यमिमं स्तवं प्रतिदिनं प्रातर्निशं यः पठेत्
श्रीमत्कल्पककुञ्जरानन-कृपापाङ्गाव लोकान्नरः ।
यं यं कामयते च तं तमखिलं प्राप्नोति निर्विघ्नतः
कैवल्यं च तथाऽन्तिमे वयसि तत्सर्वार्थसिद्धिप्रदम् ॥ ६॥

इति श्रीमदुमापतिशिवप्रणीतः श्रीकल्पकगणेशपञ्चरत्नस्तवः सम्पूर्णः ।



चिन्तामणिषट्पदी

चिन्तामणिषट्पदी ।

श्रीगणेशाय नमः ।

द्विरदवदन विषमरद वरद जयेशान शान्तवरसदन ।
सदनवसादन सादनमन्तरायस्य रायस्य ॥ १॥

इन्दुकल कलितालिक सालिकशुम्भत्कपोलपालियुग ।
विकटस्फुटकटधाराधारोऽस्य प्रपञ्चस्य ॥ २॥

परपरशुपाणिपाणे पणितपणायेः
पणायितोऽसि यतः ।
आरुह्य वज्रदन्तं विदधासि विपदन्तम् ॥ ३॥


लम्बोदर दूर्वासन शयधृतसामोदमोदकाशनक ।
शनकैरवलोकय मां यमान्तरायापहारिदृशा ॥ ४॥

आनन्दतुन्दिलाखिलवृन्दारकवृन्दवन्दिताङ् घ्रियुग ।
सराप्रदण्डरसालो नागजभालोऽतिभासि विभो ॥ ५॥

अगणेयगुणेशात्मज चिन्तकचिन्तामणे गणेशान ।
स्वचरणशरणं करुणावरुणालय पाहि मां दीनम् ॥ ६॥

कचिरवचोऽमृतरावोन्नीता नीता दिवस्तुतिः स्फीता ।
इति षट्पदी मदीया गणपतिपादाम्भुजे विशतु ॥ ७॥

इति चिन्तामणिषट्पदी समाप्ता ॥



गोकर्ण गणाधिपस्तुती

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु
सार्वभौम श्रीश्री शिवाभिनव नृसिंह भारती
महास्वामिरनुग्रहीता ।

कुक्षिस्फुरन्नागभीत्या मूषिकः प्रपलायते ।
इति मत्वा मयूरं किमारूढोऽसि गनाधिप ॥ १॥

मत्कुक्षिसुस्थमखिलजगदिति सर्वान् प्रबोधयितुम् ।
बृहदुदरतां कृपाब्धे
धत्से किम् करिवरास्य त्वम् ॥ २॥

त्वद्दर्शनकृतहासं चन्द्रमसं हन्तुमुद्युक्तम् ।
त्वामनुनेतुं ताराः कुसुमव्याजेन सेवन्ते ॥ ३॥

यज्जातुर्येण हि लोकानुद्धर्तुमम्बिकानाथः ।
गोकर्णे स्थितिमकरोल्लोकहितं
तं प्रणौमि विघ्नेशम् ॥ ४॥


॥ इति श्रीगणाधिपस्तुतिः सम्पूर्णा ॥

गोकर्णक्षेत्रे

महागणपती स्तोत्र



श्रीगणेशाय नमः ।। नारद उवाच ।।
प्रणम्य शिरसा देवं गौरीपुत्रं विनायकं ।।
भक्तावासं स्मरेन्नित्यं आयुःकामार्थसिद्धये ।। १।।
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ।।२।।
लंबोदरं पञ्चमं च षष्ठं विकटमेव च ।।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् ।।३।।
नवमं भालचन्द्रं च दशमं तु विनायकम् ।।
एकादशं गणपतिं द्वादशम् तु गजाननं ।।४।।
द्वादशैतानि नामानि त्रिसंध्य यः पठेन्नरः ।।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ।।५।।
विद्यार्थी लभते विद्या धनार्थी लभते धनं ।।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिन् ।।६।।
जपेद् गणपतिस्तोत्रं षडभिमासैः फ़लम् लभेत् ।।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ।।७।।
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ।।८।।
इति श्रीनारदपुराणे संकटनाशनस्तोत्रं संपूर्णम् ।।



ब्रह्माद्यर्षिगणाकृता श्रीगणेशस्तुतिः

भृगुरुवाच ।

नमो नमस्तेऽखिल लोकनाथ ! नमो नमस्तेऽखिललोकधामन् ।
नमो नमस्तेऽखिललोककारिन्
! नमो नमस्तेऽखिललोकहारिन् ॥ १०॥
नमो नमस्ते सुरशत्रुनाश ! नमो नमस्ते हृतभक्तपोष ! ।
नमो नमस्ते निजभक्तिपोष
! नमो नमस्ते लघुभक्तितोष ! ॥ ११॥
निराकृते ! नित्यनिरस्तमाय ! परात्परब्रह्ममयस्वरूप ! ।
क्षराक्षरातीत गुणैर्विहीन !
दीनानुकम्पिन् ! भगवन् ! नमस्ते ॥ १२॥
निरामयायाखिलकामपूर ! निरञ्जनायाखिलदैत्यदारिन् ! ।
नित्याय सत्याय परोपकारिन् ! समाय सर्वत्र नमो नमस्ते ॥ १३॥
इति ब्रह्माद्यर्षिगणाकृता श्रीगणेशस्तुतिः सम्पूर्णा ॥

- ॥ श्रीगणेशपुराणं क्रीडा (उत्तर)खण्डः । अध्यायः ६ । २.६ १०-१३॥

वाल्मीकिकृतं श्रीगणेशस्तवनम्
अथवा गणेशाष्टकम्



चतुःषष्टिकोट्याख्यविद्याप्रदं त्वां सुराचार्यविद्याप्रदानापदानम् ।
कठाभीष्टविद्यार्पकं दन्तयुग्मं कविं बुद्धिनाथं कवीनां नमामि ॥ १॥
स्वनाथं प्रधानं महाविघ्ननाथं निजेच्छाविसृष्टाण्डवृन्देशनाथम् ।
प्रभु दक्षिणास्यस्य विद्याप्रदं त्वां कविं बुद्धिनाथं कवीनां नमामि ॥ २॥
विभो व्यासशिष्यादिविद्याविशिष्टप्रियानेकविद्याप्रदातारमाद्यम् ।
महाशाक्तदीक्षागुरुं श्रेष्ठदं त्वां कविं बुद्धिनाथं कवीनां नमामि ॥ ३॥
विधात्रे त्रयीमुख्यवेदांश्च योगं महाविष्णवे चागमाञ् शङ्कराय ।
दिशन्तं च सूर्याय विद्यारहस्यं कविं बुद्धिनाथं कवीनां नमामि ॥ ४॥
महाबुद्धिपुत्राय चैकं पुराणं दिशन्तं गजास्यस्य माहात्म्ययुक्तम् ।
निजज्ञानशक्त्या समेतं पुराणं कविं बुद्धिनाथं कवीनां नमामि ॥ ५॥
त्रयीशीर्षसारं रुचानेकमारं रमाबुद्धिदारं परं ब्रह्मपारम् ।
सुरस्तोमकायं गणौघाधिनाथं कविं बुद्धिनाथं कवीनां नमामि ॥ ६॥
चिदानन्दरूपं मुनिध्येयरूपं गुणातीतमीशं सुरेशं गणेशम् ।
धरानन्दलोकादिवासप्रियं त्वां कविं बुद्धिनाथं कवीनां नमामि ॥ ७॥
अनेकप्रतारं सुरक्ताब्जहारं परं निर्गुणं विश्वसद्ब्रह्मरूपम् ।
महावाक्यसन्दोहतात्पर्यमूर्तिं कविं बुद्धिनाथं कवीनां नमामि ॥ ८॥
इदं ये तु कव्यष्टकं भक्तियुक्तास्त्रिसन्ध्यं पठन्ते गजास्यं स्मरन्तः ।
कवित्वं सुवाक्यार्थमत्यद्भुतं ते लभन्ते प्रसादाद् गणेशस्य मुक्तिम् ॥ ९॥

इति वाल्मीकिकृतं गणेशस्तवनं समाप्तम् ।



श्रीगजाननारात्रिका

(गेयम्)

जय देव जय देव जयगजमुखदेव ।
सच्चित्सुखघनरूप सर्वानन्दकर ॥ ध्रुवपदम् ॥

ओङ्कारैकस्वरूप परब्रह्माकार
सर्वाभयवररूप नित्यं मोक्षकर ।
सर्वामरनुतमार्चनसंस्कृतपदयुगल
सर्वाग्रणिविधिहरिहरसर्वामररूप ॥ १॥

तिमिराज्ञाननिवारकदिनमणिमतिशुद्ध
भवभयहरचिद्रत्नं सकलाभीष्टकर ।
दैवीसम्पत्पूरितनिजसुखकरचन्द्र
आत्मज्ञानविरक्तिश्रेयस्सिद्धिकर ॥ २॥

ॐ गं गणपतयेनघमनुविग्रहदेव
सकलपापविनाशकमङ्गलमतिपूत ।
दोषघ्न पापघ्न शापघ्न विभव
विघ्नाम्बुधिशोषणकरमद्भुतमुखकमल ॥ ३॥

स्वानन्दामृतलोक वैदिकधर्मगुरो
श्रुतिपावितसच्चरितप्रदमतिहितवन् ।
धर्मोद्धारधुरीण धरणीभाग्यकर
अविरततत्त्वमसीति बोधनपटुदेव ॥ ४॥

सुमुखविनायकनाम्ना कृतयुगपरिपाल
गणेश इति नाम्ना तु त्रेतापरिपाल ।
गजमुखनाम्नाप्येवं द्वापरपरिपाल
कलिकामादिनिवारणब्रह्मानन्दकर ॥ ५॥

इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरु भगवान्
श्रीधरस्वामीमहाराजविरचिता श्रीगजाननारात्रिका सम्पूर्णा ।

श्रीक्षेत्रवरदपुरं, गणेशचतुर्थी

गणपतिस्तोत्रम्



सुवर्णवर्णसुन्दरं सितैकदन्तबन्धुरं
गृहीतपाशकाङ्कुशं वरप्रदाभयप्रदम् ।
चतुर्भुजं त्रिलोचनं भुजङ्गमोपवीतिनं
प्रफुल्लवारिजासनं भजामि सिन्धुराननम् ॥ १॥

किरीटहारकुण्डलं प्रदीप्तबाहुभूषणं
प्रचण्डरत्नकङ्कणं प्रशोभिताङ्घ्रियष्टिकम् ।
प्रभातसूर्यसुन्दराम्बरद्वयप्रधारिणं
सरलहेमनूपुरं प्रशोभिताङ्घ्रिपङ्कजम् ॥ २॥

सुवर्णदण्डमण्डितप्रचण्डचारुचामरं
गृहप्रतीर्णसुन्दरं युगक्षणं प्रमोदितम् ।
कवीन्द्रचित्तरञ्जकं महाविपत्तिभञ्जकं
षडक्षरस्वरूपिणं भजेद्गजेन्द्ररूपिणम् ॥ ३॥

विरिञ्चिविष्णुवन्दितं विरूपलोचनस्तुतिं
गिरीशदर्शनेच्छया समर्पितं पराशया ।
निरन्तरं सुरासुरैः सपुत्रवामलोचनैः
महामखेष्टमिष्टकर्मसु (स्मृतं) भजामि तुन्दिलम् ॥ ४॥

मदौघलुब्धचञ्चलार्कमञ्जुगुञ्जितारवं
प्रबुद्धचित्तरञ्जकं प्रमोदकर्णचालकम् ।
अनन्यभक्तिमानवं प्रचण्डमुक्तिदायकं
नमामि नित्यमादरेण वक्रतुण्डनायकम् ॥ ५॥

दारिद्र्यविद्रावणमाशु कामदं स्तोत्रं पठेदेतदजस्रमादरात् ।
पुत्रीकलत्रस्वजनेषु मैत्री पुमान्भवेदेकवरप्रसादात् ॥६॥

इति श्रीमच्छङ्कराचार्यविरचितं गणपतिस्तोत्रं सम्पूर्णम् ।

श्रीगणेश गायत्री



ॐ लम्बोदराय विद्महे महोदराय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

(अग्निपुराण ७१ अध्याय)

ॐ महोत्कटाय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

(अग्निपुराण, १७९ अध्याय)

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥ (गणपत्यथर्वशीर्ष)

ॐ तत्कराटाय विद्महे हस्तिमुखाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

(मैत्रायणीय-संहिता)

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

(तैत्तिरीयारण्यक-नारायणोपनिषद्)

श्रीगणेशपञ्चकम्



ॐ

श्रीरामजयम् ।


सद्गुरु श्रीत्यागराजस्वामिने नमो नमः ।
ॐ विनायकाय विद्महे । विघ्नघ्नाय च धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

अथ श्रीगणेशपञ्चकम् ।

विनायकैकदन्ताय व्यासभारतलेखिने ।
विद्यारम्भविनूताय विघ्नेश्वराय ते नमः ॥ १॥
गणेश्वराय गम्याय गानारम्भनुताय च ।
गंरूपाय गरिष्ठाय गौरीसुताय ते नमः ॥ २॥
अक्षरारम्भवन्द्याय आगाधज्ञानसिद्धये ।
इहलोकसुसन्नेत्रे ईशपुत्राय ते नमः ॥ ३॥
उत्तमश्लोकपूज्याय ऊर्ध्वदृष्टिप्रसादिने ।
एकचित्तप्रदात्रे च ऐक्यध्येयाय ते नमः ॥ ४॥
ओंकारवक्रतुण्डाय औपहारिकगीतये ।
पञ्चकश्लोकमालाय पुष्पार्चिताय ते नमः ॥ ५॥
मङ्गलं गणनाथाय सर्वारम्भाय मङ्गलम् ।
मङ्गलं जयकाराय हेरम्भाय सुमङ्गलम् ॥ ६॥
इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया कृतं
श्रीगणेशपञ्चकं गुरौ समर्पितम् ।

ॐ शुभमस्तु ।

गणेशप्रार्थना



श्रीविनायको विजयतेराम् ।

(वसन्ततिलका वृत्तम्)

आनन्दरूप करुणाकर विश्वबन्धो
सन्तापचन्द्र भववारिधिभद्रसेतो ।
हे विघ्नमृत्युदलनामृतसौख्यसिन्धो
श्रीमन्विनायक तवाङ्घ्रियुगं नतास्स्मः ॥ १॥


यस्मिन्न जीवजगदादिकमोहजालं
यस्मिन्न जन्ममरणादिभयं समग्रम् ।
यस्मिन्सुखैकधनभूम्नि न दुःखमीषत्
तद्ब्रह्म मङ्गलपदं पव संश्रयामः ॥ २॥

विद्यावतार तव कोशशुभोदयो यः
भास्वत्सुखोदयवदेव तमोनुदस्स्यात् ।
आनन्दमात्रनिजरूपपदं वितन्वन्
राराजतां भुवि सदैव सुखैकधामन् ॥ ३॥

हे भक्तवत्सल तवैव कृपाब्धिजातः
त्वक्कोशकल्पतरुरत्र शुभं तनोतु ।
त्वत्प्रीतिभाक् तव कृपापरिपोषितोऽयं
त्वत्पादकञ्जयुगले सुसमर्पितोऽस्तु ॥ ४॥

नित्यं समाधिकुसुमार्चितपादपद्म
आम्नायदीपपरिशोभितदिव्यगात्र ।
सन्मङ्गलानि विदधत्परमोक्षदो यः
नित्यं चकास्तु भुवि वैदिकविश्वधर्मः ॥ ५॥

इति श्री श्रीधरस्वामीविरचिता
गणेशप्रार्थना समाप्ता ।



श्रीगणेशस्तवः

श्रीमुव्वात्तुप्पुलाक्षेत्रे)

जननी मृगयतु मामित्याच्छाद्यात्मस्वरूपमीशतनुः ।

भासि गिरिजात्मज त्वं करिवरवदन मे ब्रूहि ॥ १॥

इति शृङ्गेरि श्रीजगद्गुरु

श्रीसच्चिदानन्दशिवाभिनवनृसिंह-

भारतीस्वामिभिः विरचितः श्रीगणेशस्तवः सम्पूर्णः ।

ममासुरकृता श्रीगणेशस्तुतिः




॥ श्रीगणेशाय नमः ॥

ममासुर उवाच ।

कमलाय नमस्तुभ्यं गणेशशस्त्रमुख्यक ।
वासनानां परेशाय सुवासधारिणे नमः ॥ ३॥
विषयेषु सुवासेन मोहिताः सम्भ्रमन्ति ते ।
संसारे दुःखसंयुक्ताः सुखयुक्ताः त्वया कृताः ॥ ४॥
योगवासनया युक्ता ब्रह्मभूता भवन्ति ते ।
वासनानां प्रभेदाश्च बहवस्तेषु किं ब्रुवे ॥ ५॥
तेषां ब्रह्मस्वरूपाय खेलकाय नमो नमः ।
विश्वं कमलसम्भूतं पद्माकारं वदन्ति तत् ॥ ६॥
अतस्त्वां कः समर्थः स्यात् स्तोतुं शस्त्रोत्तमोत्तम ।
नमो नमः प्रसन्न त्वं भव मां रक्ष ते भयात् ॥ ७॥
दैत्येशं संस्तुवन्तं तं दृष्ट्वा शान्तिं समादधे ।
कमलं गणराजस्य हस्तगं प्रबभूव ह ॥ ८॥
ममासुरः प्रसन्नात्मा काव्येन विघ्ननायकम् ।
जगाम तं प्रणम्यैव पुपूजे भक्तिसंयुतः ॥ ९॥
पुनः प्रणम्य विघ्नेशं कृत्वा करपुटं प्रिये ।
तुष्टाव हर्षसंयुक्तो ज्ञात्वा तं ब्रह्मनायकम् ॥ १०॥
इति ममासुरकृता श्रीगणेशस्तुतिः सम्पूर्णा ॥

॥ मुद्गलपुराणं सप्तमः खण्डः । अध्यायः ८ । ७.८ ३-१०॥

श्रीगणेशन्यासः



आचम्य, प्राणायामं

संकल्पं च कृत्वा , दक्षिणहस्ते

वक्रतुण्डाय नमः ।

वामहस्ते शूर्पकर्णाय नमः ।

ओष्ठे विघ्नेशाय नमः ।

अधरोष्ठे चिन्तामणये नमः ।

सम्पुटे गजाननाय नमः ।

दक्षिणपादे लम्बोदराय नमः ।

वामपादे एकदन्ताय नमः ।

शिरसि एकदन्ताय नमः ।

चिबुके ब्रह्मणस्पतये नमः ।

दक्षिणनासिकायां विनायकाय नमः ।

वामनासिकायां ज्येष्ठराजाय नमः ।

दक्षिणनेत्रे विकटाय नमः ।

वामनेत्रे कपिलाय नमः ।

दक्षिणकर्णे धरणीधराय नमः ।

वामकर्णे आशापूरकाय नमः ।

नाभौ महोदराय नमः ।

हृदये धूम्रकेतवे नमः ।

ललाटे मयूरेशाय नमः ।


दक्षिणबाहौ स्वानन्दवासकारकाय नमः ।

वामबाहौ सच्चित्सुखधाम्ने नमः ॥

इति मुद्गलपुराणोक्तो

गणेशन्यासः समाप्त ॥

श्रीगणेशस्तोत्रं सार्थम्



श्रीगणेशाय नमः । नारद उवाच ।

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये ॥ १॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥ २॥
लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् ॥ ३॥
नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥ ४॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरः प्रभुः ॥ ५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ॥ ६॥
जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ७॥
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥ ८॥

॥ इति श्रीनारदपुराणे संकटनाशनं गणेशस्तोत्रं सम्पूर्णम् ॥

श्रीविनायकस्तुतिः



(श्रीकालटिक्षेत्रे)

अश्वत्थोऽयं प्रपञ्चो न हि खलु
सुखलेशोऽप्यत्र तस्माज्जिहास्यो
लोका इत्यादरेण प्रणतभयहरो वारणाग्र्यास्य एषः ।
बोधायैव स्वयं किं वसति दृढतराश्वत्थमूले कृपालु-
र्नाहं जानामि यूयं वदत
बुधवराः किं तथा वान्यथा वा ॥

इति शृङ्गेरि श्रीजगद्गुरु
श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः
विरचिता विनायकस्तुतिः सम्पूर्णा ।

प्रतिमास
गणेशनामस्तोत्रम्



मार्गे गणपतिः

पूज्यः पौषे चैव विनायकः ।

गजवक्त्रो माघमासे

भालचन्द्रोऽथ फाल्गुने ॥

उपेन्द्रश्चैत्रमासे च वैशाखे विघ्ननाशनः ।

ज्येष्ठे शिवसुतः

पूज्यः आषाढे हरनन्दनः ॥

श्रावणे विघ्नराजस्तु

भाद्रेऽथ मोदकप्रियः ।

अश्विने कार्तिके बीजम् विघ्नहर्ताधिके

मासे । एवं पूज्यो गणेश्वरः ॥

इति प्रतिमासगणेशनामस्तोत्रं

सम्पूर्णम् ।



षोडशगणपतिस्तवम्

प्रथमं बालविघ्नेशं द्वितीयं तरुणं तथा ।
तृतीयं भक्तविघ्नेशं चतुर्थं वीरविघ्नकम् ॥
पञ्चमं शक्तिविघ्नेशं षष्ठं ध्वजगणाधिपम् ।
सप्तमं पिङ्गलं देवं तथा चोच्छिष्टनायकम् ॥
नवमं विघ्नराजेन्द्रं दशमं क्षिप्रदायकम् ।
एकादशं तु हेरम्बं द्वादशं लक्ष्मिनायकम् ॥
त्रयोदशं महासंज्ञं भुवनेशं चतुर्दशम् ।
नृत्ताख्यं पञ्चदशं षोडशोर्ध्वगणाधिपम् ॥
स्तोत्रं तु विघ्नराजस्य कथ्यते षोडशात्मकम् ।
धर्मार्थकाममोक्षार्थं नराणां येन विद्यते ॥
॥ इति षोडशगणपतिस्तवं सम्पूर्णम् ॥